UGC - CARE LISTED
ISSN: 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध-प्रभा

(A Reffered & Peer-Reviewed Quarterly Research Journal)

Vol. 48, द्वितीया अंक, Book No.03: 2023

प्रधानसम्पादकः
प्रो.मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो.शिवशङ्करमिश्रः

सहसम्पादकः
डॉ.ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
केन्द्रीयविश्वविद्यालयः
नवदेहली-16

ISSN: 0974-8946
Vol. 48, द्वितीया अंक Book No.03: 2023

"व्याकरणस्मृतेरुपयोगिता प्रतिपादने एकं समीक्षात्मकम् आलोचनम्"

पार्थः च्याटार्जी, अतिथिः अध्यापकः(SACT)-धनियाखाली शरत् सेन्टिनारी महाविद्यालयः, हुगली
"(partha.mail90@gmail.com)"

भाषा भावस्य वाहिका- इत्युच्यते। भाषा हि लोकस्य सर्वश्रेष्ठनिधिरस्ति। इयं तु अस्माकं सांस्कृतिक-सामाजिक-व्यवहारस्य माध्यमरुपा।
भाषा तदा कालजयी भविष्यति यदा भाषायाः एकं सुसमृद्धं व्याकरणं भविष्यति। यथि बिना पद्मगुच्छैः यादृशी अवस्था, व्याकरणं विना भाषायाः तादृशी अवस्था भवति। व्याकरणं तु अपराविद्या। वेदात् एव अस्य उत्पत्तिरभवत्। इदं तु वेदाङ्गम्। छान्दोग्योपनिषदि व्याकरणं "वेदानां वेदम्"इत्यभिधीयते।तत्र भाष्यकारेण शङ्कराचार्येण उक्तं च-"वेदानां वेदं व्याकरणम्।"इत्यर्थः।
भाषायाः स्वरुपं सर्वदा परिवर्तते। भाषायाः आधारेण व्याकरणोन्मेषः भवति। अतः भाषायाः प्रयोगाधारेण परिवर्तनाधारेण च अधुना मया व्याकरणशास्त्रपाठस्य प्रयोजनं वर्णितम् ।
शास्त्रपाठपूर्वं शास्त्रपाठस्य प्रयोजनं प्रतिपादनम् अवश्यमेव कर्तव्यम्।कुतः 'प्रयोजनमविज्ञाय न मन्दोऽपि प्रवर्तते।' प्रसङ्गेण 'श्लोकवार्तिकि' कुमारिलभट्टेण चोक्तम्-

" "सर्व्वस्यैव हि" "शास्त्रस्य कर्म्मणो वापि" "कस्यचित्।"
"यावत्" "प्रयोजनं नोक्तं तावत् तत् केन" "गृह्यते।।"१"

व्याकरणस्य मुख्यप्रयोजनविषये महाभाष्यकारेण पतञ्जलिनोक्तम् -" "रक्षोहागमलघ्वसन्देहः" "प्रयोजनम्।"२" अत्र पतञ्जलिना व्याकरणपाठस्य मुख्यरुपेण पञ्च प्रयोजनानि उक्तानि।

असाधुशब्देभ्यः साधुशब्दानां ज्ञानमेव व्याकरणशास्त्राध्ययनस्य साक्षात्प्रयोजनभूतम्। महाभाष्यकारः पतञ्जलिः वदति- " "अथ शब्दानुशासनम्।"" ३ पुनः वेदरक्षोहादीनि व्याकरणाध्ययनस्य परम्परासम्बन्धेन मुख्यप्रयोजनानि भवन्ति। महाभाष्यप्रदीपे चोक्तम्-"भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात्प्रयोजनमाह अथ शब्दानुशासनमिति। प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद् वक्ष्यति।"४

(१)"तेऽसुराः"(२)"दुष्टः शब्दः"(३)"यदधीतम्"(४)"यस्तु प्रयुङ्क्ते"(५)"अविद्वांसः"(६) "विभक्तिं कुर्वन्ति"(७)"यो वा इमान्"(८)"चत्वारि"(९)"उत त्वः"(१०)"सक्तुमिव"(११)
"सारस्वतीम्"(१२)"दशम्यां पुत्रस्य"(१३)"सुदेवो असि वरुणः"इति ।।(१२)-इमानि शास्त्रवाक्यानि वेदस्य ब्राह्मणग्रन्थेभ्यः उद्धृतानि। एतेभ्यः शास्त्रवाक्येभ्यः व्याकरणाध्ययनस्य आनुषङ्गिकप्रयोजनानि सूचितानि।आगमादयः यथा व्याकरणाध्ययनस्य प्रवर्तकाः तथा 'तेऽसुराः'प्रभृतयः व्याकरणाध्ययनस्य प्रवर्तकाः भवन्ति।म्लेच्छता निवारणमपि व्याकरणाध्ययनस्य प्रयोजनम्। महाभाष्यकारेणोक्तम् - " "तस्माद्" "ब्राह्मणेन न म्लेच्छितवै" "नापभाषितवै," "म्लेच्छो ह वा यदपशब्दः।"" "म्लेच्छा मा भूमेत्यध्येयं" "व्याकरणम्। "तेऽसुराः"५" ।।१३।। महाभाष्यकारः पतञ्जलिः शास्त्रवाक्यानाम् प्रत्येकं प्रथमम् अंशम् उद्धृतवान् पर्यायक्रमेण च तेषां सम्पूर्णोल्लेखपूर्वकं व्याख्यातवान्। अत्र मया व्याकरणाध्ययनस्य परम्परासम्बन्धेन मुख्यप्रयोजनानि लिख्यते।

व्याकरणं वेदपुरुषस्य मुखरुपेण कल्पितमस्ति। पाणिनीयशिक्षायाम् उक्तं च- " "वेदस्य मुखं व्याकरणं स्मृतम्।"" ६ व्याकरणं षट्सु वेदाङ्गेषु प्रधानं च सर्वेषां तपसाम् उत्तमं तपः।"वाक्यपदीये" भर्तृहरिणोक्तम्-

" "आसन्नं" "ब्रह्मणस्तस्य" "तपसामुत्तमं तपः।"
"प्रथमं" "छन्दसामङ्गं प्राहुर्व्याकरणं" "बुधाः।।"७"